# नागेशदिशा शक्तिनियामकविचारः

**डॉ अरविन्दकुमारपाण्डेयः**
संस्कृतविद्याधर्मविज्ञानसंकाय
काशीहिन्दूविश्वविद्यालय वाराणसी
arvindpandeysvdv@gmail.com

**सारांशः –**

लेखेऽस्मिन् नागेशभट्टदिशा शक्तिनियामकानां संयोगविप्रयोगादीनां विवरणं कृतं वर्तते। अत्र शक्तिनियामकान् सोदाहरणानि भाष्यादिप्रामाण्येन व्याख्याय समीक्ष्य च अयं निष्कर्षः प्रतिपादितोऽस्ति –

1. वस्तुतः अत्र ( नानार्थकेषु ) सामर्थ्यमेव मुख्यं निर्णायकं वर्तते संयोगादयस्तु तद्व्यञ्जकप्रपञ्चाः सन्ति।
2. नागेशेन शक्तिनियामकानां व्याख्याप्रसङ्गे भर्तृहरेः कारिकाद्वयस्य व्याख्यायाम् उदाहरणेषु च किमपि नूतनं स्वोपज्ञं तथ्यं न प्रतिपादितम्।
3. नागेशव्याख्यापरिशीलनेन तथ्यमिदमवगतं भवति यद् नागेशः सर्वत्र पुण्यराजम् अनुकरोति। यत्र पुण्यराजस्य अनुकरणं न वर्तते तत्र काव्यप्रकाशकर्तुः मम्मटस्य अनुकरणं कृतं वर्तते।

## भूमिका -

व्याकरणशास्त्रं मुख्यं शक्तिग्राहकमिति प्रथितमस्ति[1]। अतश्च प्रकृति-प्रत्ययव्युत्पादके व्याकरणशास्त्रे अर्थनिर्णयविचारोऽपि भवतीति निश्चीयते। व्युत्पत्तिनिमित्तसाम्यात् केचन यौगिकाः शब्दाः नानार्थकाः जायन्ते। यथोक्तं हरिणा –

**एकस्यापि शब्दस्य निमित्तैरव्यवस्थितैः।**
**एकेन बहुभिश्चाऽर्थो बहुधा परिकल्प्यते[2]।। इति।**

अतश्च तस्मिंस्तस्मिन् प्रसङ्गविशेषे अनेकार्थकशब्दस्य स स एवार्थविशेषो जायताम्, नान्य इति प्रकारकं संविधानकं कतिपयशक्तिनियामकसाधनानां साधितं वैयाकरणैरर्थविनिश्चितये। शक्तिनियामकसाधनानां विचारः व्याकरणे स्पष्टतया भर्तृहरिणा विहितः। भर्तृहरिणा अर्थसंशयस्थले अर्थविनिश्चितये साक्षात् प्रायः चतुर्दश विशेषस्मृतिहेतवः परिगणिताः सन्ति। ततश्च भर्तृहरिमुपजीव्य नागेशभट्टेन स्वकीयायां मञ्जूषायां

---

[1] **'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः'**।। (भाट्टचिन्तामणिः, पृष्ठम् – 56, न्यायसिद्धान्तमुक्तावली, पृष्ठम् – 296)

[2] वाक्यपदीयम् ( 2.139 )

शक्तिनिरूपणप्रसङ्गे शक्तिनियामकाः प्रतिपादिताः। आलङ्कारिकैरपि भर्तृहरिसम्मतिं प्रदर्श्य अभिधामूलव्यञ्जनायाः प्रतिष्ठापने शक्तिनियामकसाधनानां सलक्षणं निरूपणमकारि। आलङ्कारिकाः शक्त्या प्राकरणिकार्थस्य भानं स्वीकुर्वन्ति, ततश्च नानार्थकशब्दस्य प्राकरणिकेऽर्थे नियन्त्रिते सति अप्राकरणिकार्थस्य ज्ञानं व्यञ्जनया अङ्गीकुर्वन्ति। तन्मते नात्र लक्षणाप्रसक्तिः, मुख्यार्थबाधाद्यभावात्। तस्मादत्र व्यञ्जना अवश्यमेव स्वीकार्येति आलङ्कारिकाणां मतम् । सिद्धान्तस्यास्य प्रतिपादनं मुख्यतः मम्मटाचार्येण[3], पण्डितराजेन[4], कविराजविश्वनाथेनापि[5] स्वग्रन्थेषु कृतम्। सन्दर्भेऽस्मिन् नागेशेनाऽपि स्वमतं प्रस्तुतं वर्तते वैयाकरणसिद्धान्तमञ्जूषायाम्। तैरेतादृशस्थले व्यञ्जनायाः अनावश्यकता प्रतिपादिता[6]। नागेशः शक्तिनियामकान् सोदाहरणानि प्रत्यपादयत्। तत्रोदाहरणप्रदर्शनावसरे स कुत्रचिद् पुण्यराजम् अनुसरति कुत्रचिच्च मम्मटाद्याचार्यम्। अत्र वयं नागेशदिशा शक्तिनियामकान् निरूप्य नागेशे साहित्यप्रभावोऽपि परीक्षामहे।

**शक्तिनियामकाः -**

परमलघुमञ्जूषायां शक्तिप्रकरणे शक्तेः त्रैविध्यं प्रतिपाद्य श्रीनागेशेन शक्तिनियामकसाधनानां विवेचनमकारि। एकस्य शब्दस्य नैके अर्थाः यदि भवन्ति तर्हि कुत्र कः अर्थः ग्राह्य इति जिज्ञासायां वाच्यार्थनियामकसाधननिकराः प्रस्तूयन्ते –

**'संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः[7]।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।'[8]**

---

3 अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्।। काव्यप्रकाशः, द्वितीयोल्लासः, कारिका – 19, पृष्ठम् – 63

4 अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्।। रसगङ्गाधरः, द्वितीयमाननम्, पृष्ठम् – 04

5 अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीर्हेतुर्व्यञ्जना साऽभिधाश्रया।। साहित्यदर्पणः, द्वितीयपरिच्छेदः, कारिका – 14, पृष्ठम् - 76

6 प्रकरणादिवशात् प्राकरणिकेऽर्थे तात्पर्यविषयतया निर्णीते तात्पर्यविषयीभूतद्वितीयार्थबोधो व्यञ्जनयेत्यपास्तम्, प्रागुक्तरीत्या शक्त्यैवोपपत्तौ तत्र व्यञ्जनाकल्पनस्य गुरुत्वात्। ( वैयाकरणसिद्धान्तमञ्जूषा , पृष्ठम् – 18 )

7 वाक्यपदीयम् 2.3.17

8 वाक्यपदीयम् 2.3.18
वाक्यपदीयस्य द्वितीयकाण्डे विषयेऽस्मिन् एका अन्यापि कारिका वर्तते –
वाक्यात् प्रकरणात् अर्थात् औचित्याद् देशकालतः।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात्।। ( 2.318 )

एतत्कारिकाद्वयं नागेशेन लघुमञ्जूषायामप्युद्धृतम्[9]। वैयाकरणसिद्धान्तमञ्जूषायाम् अनयोः कारिकयोः सङ्केतमात्रं वर्तते[10]। नानार्थकेषु शब्देषु वर्त्तमाना वाच्यवाचकभावरूपाशक्तिः संयोगविप्रयोगादिभिरुपायैः शक्तिनियामकैः एकत्र विशेषार्थे निश्चीयते। ते च शक्तिनियामकाः एते सन्ति –

1. संयोगः
2. विप्रयोगः
3. साहचर्यम्
4. विरोधिता
5. अर्थः
6. प्रकरणम्
7. लिङ्गम्
8. शब्दस्य अन्यसन्निधिः
9. सामर्थ्यम्
10. औचिती
11. देशः
12. कालः
13. व्यक्तिः
14. स्वरादयः ( अत्र आदिपदेन षत्व-णत्व-नत्वादयो ग्राह्याः )

इदमत्र ध्येयम् - अत्र श्लोकस्य व्याख्यावसरे पुण्यराजः मतद्वयं प्रदर्शयति[11]। पुण्यराजव्याख्याम् अनुसृत्य नागेशभट्टोऽपि वैयाकरणसिद्धान्तलघुमञ्जूषायां वदति – “अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयोगादयस्तद्व्यञ्जकप्रपञ्चाः तैः सामर्थ्यस्यैवाभिव्यक्तेरिति परे”[12]।

**‘प्रकरणादिना अर्थनिर्णयः कर्त्तव्यः’ इत्यर्थे भाष्यप्रमाणम् -**

9 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ. 90

10 सा चेयं शक्तिः संयोगादिभिर्नानार्थशब्देषु नियम्यते। यथा “सशङ्खचक्रो हरिः” इत्यादौ। ( वैयाकरणसिद्धान्तमञ्जूषा,पृ. 18 )

11 तथाहि प्रथमं मतमिदमस्ति -
संसर्गादिभिरवच्छेदः क्रियते। एकत्वपक्षे त्वर्थाभिधाने भिन्नासु शक्तिषु श्रुतिसारूपयमात्रादलब्धविभागासु तथैव संसर्गादिभिरर्थनिर्णयः क्रियत इत्युभयत्रापि प्रकरणादयः शब्दार्थनिर्णयनिपुणा इति तदुपन्यासः कथ्यते”11।
द्वितीयं मतम् - “तदत्र केचित् सामर्थ्यमेवैकं शब्दार्थनिर्णयनिमित्तमिति मन्यन्ते। योऽप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते, सोऽपि सामर्थ्यादेवात्र प्रतीयत इति कथयन्ति। सामर्थ्यमेव हि संसर्गादिभिर्व्यज्यत इति”11। ( वाक्यपदीयम्, पृष्ठम्- 383 )

12 वैयाकरणसिद्धान्तलघुमञ्जूषा पृष्ठम् 109

अर्थनिर्णये सशंये सति प्रकरणादर्थनिर्णयो विधातव्य इत्यभिप्रायः भाष्यादपि आयाति। महाभाष्यतत्त्वविदा भर्तृहरिणा भाष्यादेव अयमर्थः व्याख्यातः इति प्रतीयते। तथाहि भगवन्तो भाष्यकाराः "बहुगणवतुडति सङ्ख्या" इति सूत्रस्य व्याख्यावसरे वदन्ति -

'अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे (कार्य)संप्रत्ययो भवति। अर्थो वाऽस्यैवंसंज्ञकेन भवति, प्रकृतं वा तत्र भवति – इदमेवंसंज्ञकेन कर्तव्यमिति। आतश्चाऽर्थात्प्रकरणाद्वा। अङ्ग हि भवान् ग्राम्यं पांशुलपादमप्रकरणज्ञमागतं ब्रवीतु – गोपालकमानय, कटजकमानयेति, उभयगतिस्तस्य भवति'[13]।

**शक्तिनियामकानां सोदाहरणं व्याख्या -**

नागेशेन मञ्जूषायां भर्तृहरिकारिकाभ्यां ये शक्तिनियामकाः संयोगादयः प्रोक्ताः ते सोदाहरणानि यथाक्रममुपवर्ण्यन्ते।

1. **संयोगः –**

प्रसिद्धवस्तुसंयोगाद् अनेकार्थवाचकाच्छब्दादभिप्रेतोऽर्थो लभ्यते। तत्र संयोगस्योदाहरणं '**सवत्सा धेनुरिति**' प्रतिपादयति नागेशः। धेनुशब्दः नानार्थकः नवप्रसूतामात्रवाचकः, तेन नवप्रसूतगोमहिष्यादितात्पर्यसन्देहे, वत्ससन्निधानेन धेनुशब्दः गोवाचकः वत्सशब्दस्य गोपुत्रवाचकत्वात् । एवञ्च वत्सस्य संयोगसम्बन्धेन धेनुपदस्य 'गौ'रित्यर्थे तात्पर्यनिर्णयः।

2. **विप्रयोगः–**

विप्रयोगः – संयोगसम्बन्धाभावः। 'सवत्सा धेनुः' इत्यत्रैव प्रयोगे नञ्समासे कृते 'अवत्सा धेनुः' इति प्रयोगे धेनुशब्दात् गवार्थस्य प्रतीतिर्जायते। प्राप्तौ सत्यां निषेध इति नियमात् यत्र प्राप्तिः तत्रैव निषेधः क्रियते। वत्ससंयोगेन गवि एव धेनुतात्पर्ये प्राप्ते अवत्सापदेन तादृशधेनोरेव निषेधः न महिष्यादेरिति। अतः '**अवत्सा धेनुरिति**' विप्रयोगस्योदाहरणम्।

3. **साहचर्यम् –**

साहचर्यस्योदाहरणं यथा – '**रामलक्ष्मणौ**' इति। '**रेवती रमणो रामः कामपालो हलायुधे**'[14] '**गन्धर्वः शरभो रामः समृरो गवयः शशः**'[15] इत्याद्यमरकोषवचनाद्रामशब्दः नानार्थकः, एवमेव लक्ष्मणशब्दोऽपि सारसदुर्योधनपुत्रादौ प्रयुक्तत्वान्नार्थकः, परञ्च यदा रामलक्ष्मणौ इति प्रयोगो भवति तदा लक्ष्मणसाहचर्याद्रामो न बलरामादिवाचकः, एवं लक्ष्मणो न

---

13 महाभाष्यम्, बहुगणवतुडति सङ्ख्या – 1.1.22, पृष्ठ - 307

14 अमरकोषः, प्रथमं काण्डम्, स्वर्गवर्गः, श्लोकः – 23, पृष्ठम् - 11

15 अमरकोषः, द्वितीयं काण्डम्, सिंहादिवर्गः, श्लोकः – 11, पृष्ठम् - 190

दुर्योधनपुत्रादिवाचकः, अपितूभयोः शब्दयोः वाचकत्वं दाशरथौ नियम्यते साहचर्यात्। अत्र **'सदृशयोरेव सहप्रयोग'**[16] इति नियमात् अर्थात् समानार्थकस्य एव शब्दस्य साहचर्यं – एकेन सह प्रयोग इति नियमात् साहचर्यं सादृश्यमिति।

4. **विरोधिता-**

विरोधस्योदाहरणं यथा - **'रामार्जुनगतिस्तयोः'**। रामशब्दस्य नानार्थकता प्रतिपादितैव एवमेव अर्जुनशब्दोऽपि कार्तवीर्यपाण्डवाद्यर्थेषु प्रसिद्धः, परञ्च तयोः गतिः रामार्जुनयोरिव भविष्यतीत्यत्र रामार्जुनयोः विरोधो प्रतीयते, अतः परशुरामकार्तवीर्ययोः प्रसिद्धविरोधादत्र रामः परशुराम एव न तु दाशरथ्यादिः, तद्वध्यत्वाच्चार्जुनः कार्तवीर्य एव न रामादिः। अतः रामः परशुरामार्थे नियम्यते अर्जुनः कार्तवीर्यार्थे विरोधात्।

5. **अर्थः -**

अत्र अर्थशब्दस्य अभिप्रायः प्रयोजने अनन्यसाध्यफले वर्तते। अर्थस्योदारणं यथा तत्र – **'अञ्जलिना जुहोति', 'अञ्जलिना सूर्यमुपतिष्ठते'।** अत्र अर्थस्य तात्पर्यमस्ति किमपि विशिष्टं प्रयोजनम्। अतः अञ्जलिना जुहोति इत्यत्र अञ्जलिपदेन वर्तुलाकाराकृतेः बोधो जायते हवनस्य सिद्ध्यर्थम्। एवमेव अञ्जलिना सूर्यमुपतिष्ठते इत्यत्र हस्तयोः नमस्कारमुद्रायाः प्रतीतिर्जायते उपासनासिद्ध्यर्थम्। अतः प्रयोजनलाभाय अञ्जलिपदं कस्मिंश्चिद् एकार्थे नियम्यते

6. **प्रकरणम्** –

प्रकरणं प्रसङ्गः वक्तृश्रोतृबुद्धिस्थविषयत्वम्[17]। प्रकरणस्य नियामकत्वं यथा– **'सैन्धवमानय'** इत्यत्र सैन्धवशब्दः लवणाश्वार्थकः। भोजनावसरे सैन्धवशब्दः लवणार्थप्रत्यायकः, युद्धावसरे तु अश्वार्थबोधकः। अतः प्रकरणविशेषाद् सैन्धवशब्दो नियम्यते।

7. **लिङ्गम्** –

लीनम् अर्थं गमयति यत् तल्लिङ्गम् अर्थात् ज्ञापकम्। नागेशः लिङ्गस्योदाहरणं प्रस्तौति - **'अक्ताः शर्कराः उपदधाति**[18]**' इति**। अत्र **'शर्कराः'** इति मृत्तिकामिश्राः क्षुद्रपाषाणाप्रायाः शर्कराः कङ्कर इति लोके प्रसिद्धाः इति कालिकाप्रसादशुक्लाः। वाक्यमिदं यज्ञप्रसङ्गे उद्धृतमस्ति। तत्र यज्ञे प्रयुक्तानां इष्टिकादीनां लेपनं प्रचलति। लेपनमिदं केन भवेदिति जिज्ञासायां तत्र अर्थवादवाक्यमुपन्यस्तम् **'तेजो वै घृतम्'** इति। अतः घृतस्तुतिरूपलिङ्गात् घृतेन लेपनं भवेदिति बोधो भवति।

16 परमलघुमञ्जूषा, कालिकाप्रसादशुक्लसंस्करणम्, शक्तिविचारः, पृष्ठम् - 52
17 परमलघुमञ्जूषा तत्त्वप्रकाशिकाव्याख्या पृ. 33
18 शाबरभाष्यम् – 1.4.13.2

8. **शब्दस्य अन्यसन्निधिः -**

अन्यशब्दसन्निधेर्नियमाकत्वे **'रामो जामदग्न्यः'** इत्युदाहरणं प्रस्तुतं नागेशेन। अत्र रामशब्दो नानार्थकः इति तु प्रस्तुतमेव, परञ्च जमदग्न्यपत्यं तु परशुराम एव। अतः जमदग्निशब्दसमभिव्याहारेण रामः परशुरामे नियम्यते।

9. **सामर्थ्यम् –**

सामर्थ्यं नाम कारणता। तत्र सामर्थ्यं द्विविधं भवति शब्दनिष्ठमर्थनिष्ठञ्चेति। नागेशेन शब्दनिष्ठसामर्थ्यस्योदाहरणं प्रस्तुतम्। तत्तु – **'अभिरूपाय कन्या देया'** इति। अत्र अभिरूपशब्दस्य सामर्थ्यबलात् अभिरूपतरमिति बोधो जायते। महाभाष्येऽपि उदाहरणमिदं "साधकतमं करणम्" इति सूत्रे तमब्ग्रहणप्रसङ्गे प्रदर्शितं वर्तते। तथाहि भाष्ये- **'एवं तर्हि लोकत एतत्सिद्धम्। तद्यथा लोकेऽभिरूपायोदकमानेयमभिरूपाय कन्या देयेति न चाभिरूपे प्रवृत्तिरस्ति तत्राभिरूपतमायेति गम्यते'**[19]**।** अर्थनिष्ठसामर्थ्यस्योदाहरणं यथा काव्यप्रकाशे – **'मधुना मत्तः कोकिलः'**[20] इति।

10. **औचित्यम् -**

औचित्यस्य उदाहरणे नागेशेन कुवलयानन्दस्य पद्यमुद्धृतम् –

**'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।**
**यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः'**[21]**।।**

अत्र श्लोके क्रियापदं नास्ति। तथापि औचित्याद् योग्यत्वात् अत्र परशुना ( परशुः काष्ठछेदकः शस्त्रविशेषः तेन ) इत्यनेन छेदनार्थत्वं गम्यते, मधुसर्पिषा इत्यादिपदेन सेचनार्थत्वस्य प्रतीतिर्जायते, गन्धमाल्याद्यैरित्यनेन पूजनार्थत्वस्य बोधो भवति।

**11.देशः -**

देशस्य नियामकत्वे **'भात्यत्र परमेश्वरः'** इत्युदाहरणम्। अत्र परमेश्वरशब्दः यद्यपि परमात्मनः अपि वाचकः तथापि राजधानीरूपदेशे तादृशवाक्यप्रयोगात् राजा अर्थः निश्चीयते। अतः देशविशेषेण नानार्थकस्य शब्दस्य एकस्मिन्नर्थे नियन्त्रणं भवति। राजधानीपदमत्र राजप्रासादवाचकम् ।

12. **कालः –**

19 महाभाष्यम्, साधकतमं करणम् – 1.4.42, पृष्ठ - 373
20 काव्यप्रकाशः, द्वितीयोल्लासः, पृष्ठम् - 65
21 श्लोकोऽयं कुवलयानन्दे तुल्ययोगिताऽलंकारप्रसङ्गे, वाक्यपदीये पुण्यराजस्य टीकायां च (2.316) इत्यत्र प्राप्यते।

कालस्य नियामकत्वं यथा – **'चित्रभानुर्विभाति'** इत्यत्र चित्रभानुपदं सूर्यार्थकः अग्न्यर्थकोऽपि। अतः दिने संयोगे पदमिदं सूर्यार्थे नियम्यते, रात्रौ संयोगे अग्न्यर्थे नियम्यते। अतः उदाहरणमिदं कालस्य नियामकतायाः।

13.**व्यक्तिः -**

व्यक्तिपदेन पुल्लिङ्गादिभेदो विवक्षितोऽत्र। लिङ्गेनापि नानार्थकस्यैकार्थे नियन्त्रणं भवति। यथा मित्रशब्दस्य पुल्लिङ्गे प्रयोगे मित्रशब्दः सूर्यवाचकः नपुसंके प्रयोगे तु सुहृद्वाचकः। अतः **'मित्रं भाति, मित्रो भाति'** इति लिङ्गस्य नियामकतायाः उदाहरणम्।

14.**स्वरः** –

समासनिर्धारणे स्वरज्ञानस्य अत्यन्तं महत्त्वम्। तत्र सन्देहे सति स्वरेण समासनिर्णयो भवति। वस्तुतस्तु लौकिके प्रयोगे स्वरेणार्थनिर्णयो न जायते। नागेशेनापि स्वरस्य नियामकत्वे वैदिकप्रयोग एव उपदर्शितः। तत्र स्वरस्य नियामकत्वं यथा – **'स्थूलपृषतीम्'** इत्यादौ। अत्र अन्तोदात्तत्वे कर्मधारयतत्पुरुषो भविष्यति, पूर्वपदप्रकृतिस्वरत्वे बहुव्रीहिः। समासभेदे अर्थभेदो भविष्यति, अतः स्वरनिर्णयः आवश्यकः। अतः नानार्थकतायाः नियन्त्रणं स्वरेणापि भवतीति।

**'स्वरादयः'** इत्यत्र आदिपदस्य पाठो वर्तते, परञ्च नागेशेन आदिपदेन किं गृहीतव्यमिति न निर्दिष्टम्। अतोऽत्र आदिपदार्थज्ञानाय कारिकायाः मूलस्थानस्य ज्ञानमावश्यकम्। इमे कारिकाः वाक्यपदीये सन्ति। तत्र कारिकाणां व्याख्याने पुण्यराजेन आदिपदस्य विवरणमित्थं प्रस्तुतम् –

**"सत्त्वाद्यथा सुसिक्तमतिस्तुतमित्यादौ पूजातिक्रमणयोः कर्मप्रवचनीयसंज्ञायामुपसर्गत्वाभावे तयोरेव प्रतिपत्तिः । उपसर्गसंज्ञायां तु सत्यां सुषिक्तं सुष्टुतमित्यादौ षत्वप्रवृत्तेरर्थान्तरस्य प्रतिपत्तिः । णत्वनत्वाभ्यां यथा प्रणायक इत्यत्रोपसर्गाश्रयणत्वसद्भावे प्रणयनक्रियाकर्तुः प्रतीतिः, णत्वाभावे तु प्रगता नायका अस्माद् देशादसौ प्रनायको देश इत्यस्य पदार्थप्रतीतिरिति"[22]।** अर्थात् श्लोके आदिपदात् षत्वम्, सत्वम्, णत्वम्, नत्वञ्च ग्राह्यम्। इममेवाभिप्रायं ब्रूते नागेशः वैयाकरणसिद्धान्तलघुमञ्जूषायाम्[23]।

22 वाक्यपदीयम् 2.315-316, हेलाराजकृद्व्याख्या
23 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृष्ठम् -

**समीक्षा –**

व्याकरणशास्त्रे भूषणादिग्रन्थेषु एतेषां शक्तिनियामकसाधनानां चर्चा नैवोपलभ्यते। प्रथमतः वाक्यपदीये ततः बाहुल्येन साहित्यशास्त्रे एतेषां विचारः प्राप्यते। नागेशस्तु स्वमतपोषणाय प्रायः भाष्यसम्मतिं हरिसम्मतिञ्च प्रमाणत्वेन प्रस्तौति। शक्तिनियामकसाधनानां प्रसङ्गेऽपि नागेशेन **तदुक्तं हरिणा**[24] इत्यनेन इमाः कारिकाः प्रस्तुताः। कारिकायाः उदाहरणं प्रायः पुण्यराजप्रदर्शितमेव नागेशेन स्वीकृतम्। यत्र पुण्यराजस्योदाहरणं न दत्तं तत्र संयोगादीनामुदाहरणे काव्यप्रकाशादिग्रन्थेषु उद्धृतानि उदाहरणान्यपि प्रस्तुतानि। यथा पुण्यराजेन वाक्यपदीयव्याख्याने देशस्य कालस्य चोदाहरणमन्यदेव प्रस्तुतं नागेशेन तत्र काव्यप्रकाशीयोदाहरणं प्रस्तुतम्। यथा पुण्यराजस्योदाहरणं तत्र –

**'देशाच्छब्दार्थनिर्णयो यता मथुरायाः प्राचीनादुदीचीनाद्वा नगरादगच्छामीत्युक्ते नगरविशेषात् पाटलिपुत्रादागच्छामीति गम्यते। पाटलिपुत्रस्य मथुरासम्बन्धिनोश्च प्राचीनोदीचीनभागयोर्विद्यते प्रत्यासत्तिरिति कृत्वा देशवशादत्र निर्णयः। कालात् खलु व्यवस्था दृश्यते, यथा शिशिरे द्वारमित्युक्ते पिधेहीति, ग्रीष्मसमये त्वेवमभिधाने समुद्घाटयेति गम्यते'**[25]**।**

अतः वक्तुं शक्यते यत् यद्यप्यत्र नागेशेन शक्तिनियामकसाधनानां विचारः स्वग्रन्थे विहितः तथापि किमपि नूतनं चिन्तनं तेषां विषयेऽस्मिन् न वर्तते। नागेशः सन्दर्भेऽस्मिन् कुत्रचित् पुण्यराजमनुकरोति कुत्रचिच्च मम्मटादिम्। एतेन नागेशोपरि पुण्यराजप्रभावः काव्यशास्त्रप्रभावश्च स्पष्टतया परिलक्ष्यते।

**सन्दर्भग्रन्थसूची –**

1. अमरकोशः (नामलिङ्गानुशासनम्), श्रीमदमरसिंहविरचितः – म. म. भट्टोजिदीक्षितात्मजविद्वद्वरश्रीभानुदीक्षितकृतया रामाश्रमीव्याख्यया विभूषितः, चौखम्भाकृष्णदास-अकादमी, वाराणसी, 2002
2. काव्यप्रकाशः, मम्मटाचार्यप्रणीतः, झकलीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया युतः, परिमलपब्लिकेशन्स, तृतीयं संस्करणम्, 2012
3. कुवलयानन्दः – श्रीमदप्पैयदीक्षितविरचितः, वैद्यनाथसूरिकृतया अलङ्कारचन्द्रिकाव्याख्यया अलङ्कृतः, सम्पादकः – आचार्य के. टी. पाण्डुरङ्गी, प्रकाशकः विद्यादिशा-स्नातकोत्तरसंस्कृतानुसन्धानकेन्द्रम्, बङ्गलूरु, 2014
4. न्यायसिद्धान्तमुक्तावली – श्रीविश्वनाथपञ्चाननविरचिता, पण्डितश्रीकृष्णवल्लभाचार्यकृतया किरणावलीव्याख्यया विभूषिता,चौखम्भासंस्कृतसंस्थानम्, वाराणसी, 2014

24 परमलघुमञ्जूषा, कालिकाप्रसादशुक्लसंस्करणम्, शक्तिविचारः, पृष्ठम् - 50
25 वाक्यपदीयम् 2.314, हेलाराजकृद्व्याख्या

5. परमलघुमञ्जूषा – श्रीनागेशभट्टविरचितः, कालिकाप्रसादशुक्लविरचितया ज्योत्स्नाख्यटीकया समलङ्कृता, महाराजसयाजिराववविश्वविद्यालयः, बडौदा, 1961
6. भाट्टचिन्तामणिः (तर्कपादः) – श्रीगागाभट्टेति प्रसिद्धनामधेयश्रीविश्वेश्वरविरचितः, पण्डितसूर्यनारायणशुक्लेन स्वकृतया मयूखटिप्पण्या प्रभाख्यया सूत्रवृत्त्या च सह सम्पादितः, चौखम्भासंस्कृतसीरीजआफिस,वाराणसी, 1933
7. रसगङ्गाधरः (द्वितीयो भागः), पण्डितराजजगन्नाथविरचितः, श्रीनागेशभट्टकृतया गुरुमर्मप्रकाशव्याख्यया समलङ्कृतः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 2000
8. वाक्यपदीयम् (वाक्यकाण्डम्), भर्तृहरिविरचितम्, हेलाराजविरचितप्रकाशव्याख्यया रघुनाथशर्मविरचित-अम्बाकर्त्रीव्याख्यया च सहितम्, सम्पादकः भागीरथप्रसादत्रिपाठी वाराणसेयसंस्कृतविश्वविद्यालयः वाराणसी, 1980
9. व्याकरणमहाभाष्यम् (नवाह्निकम्), भगवत्पतञ्जलिविरचितम्, कैय्यटविरचितप्रदीप-नागोजिभट्टविरचितोद्योत-गुरुप्रसादशास्त्रिविरचितराजलक्ष्मीटीकाभिः सहितम्, मुद्रकः प्रतिभाप्रकाशनम्, प्रकाशकः – राष्ट्रियसंस्कृतसंस्थानम्, 2009
10. साहित्यदर्पणः-कविराजविश्वनाथविरचितः,सत्यव्रतसिंहकृतया विमर्शाख्यहिन्दीव्याख्यया विभूषितः, चौखम्भाविद्याभवनम्, वाराणसी, 1957